# Rigvedaprokta Shiva Stuti

# ઋગ્વેદપ્રોક્તા શિવસ્તુતિઃ

## Document Information

Text title : Rigvedaprokta Shiva Stuti

File name : RRigvedaproktAshivastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 22| 47.2-60||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 16, 2024

*sanskritdocuments.org*

# ઋગ્વેદપ્રોક્તા શિવસ્તુતિઃ

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

ઋગ્વેદ ઉવાચ

સોમસ્ત્રિણેત્રો જનિતા ચ દિવઃ
પૃથિવ્યાશ્ચ તથાનિલાગ્ન્યોઃ ॥ ૪૭.૨॥

સૂર્યેન્દ્રયો રશ્મિમરુદ્ગણાનાં
સોમસ્ત્રિણેત્રો જનિતા ચ વિષ્ણોઃ ।
તસ્માત્સ વિષ્ણોર્જનિતા મહેશઃ
સર્વપ્રયત્નૈઃ સતતં ભવદ્ભિઃ ॥ ૪૮॥

સેવ્યઃ સ સોમઃ સ ચ મુક્તિદાતા
સ એવ મોક્ષાધિપતિશ્ચ સત્યમ્ ।
તસ્માન્મહેશાદપરં ન જાને
મુક્ત્યર્થિસેવ્યં સુરવૃન્દવન્દ્યમ્ ॥ ૪૯॥

તસ્માન્મહેશં શરણં વ્રજધ્વં
સત્યં પુનઃ સત્યમિદં ત્રિસત્યમ્ ।
સ્વર્ગાપવર્ગાદિફલપ્રદાતા
મહેશ્વરાન્યત્ર ન સર્વથૈવ ॥ ૫૦॥

અસારસંસારસમુદ્રમગ્ના
ન સર્વથા તે શિવભક્તિભાજઃ ।
તસ્માન્મહેશાદપરં ન જાને
મુક્ત્યર્થિસેવ્યં સુરવૃન્દવન્દ્યમ્ ॥ ૫૧॥

ન શઙ્કરાન્યઃ કરુણાનિધાનં
ન શઙ્કરાન્યોઽખિલવેદવેદ્યઃ ।
તસ્માન્મહેશાદપરં ન જાને
મુક્ત્યર્થિસેવ્યં સુરવૃન્દવન્દ્યમ્ ॥ ૫૨॥

યે પૂજયન્ત્યન્વહમમ્બિકેશં
તે ગર્ભભાજો ન ભવન્તિ ભૂયઃ ।
તસ્માન્મહેશાદપરં ન જાને
મુક્ત્યર્થિસેવ્યં સુરવૃન્દવન્દ્યમ્ ॥ ૫૩॥

યેષામનન્યં ચરમં શરીરં
તેષાં શિવે ભક્તિરુદેતિ નિત્યમ્ ।
તસ્માન્મહેશાદપરં ન જાને
મુક્ત્યર્થિસેવ્યં સુરવૃન્દવન્દ્યમ્ ॥ ૫૪॥

યન્માયયાયં વિધિરદ્ય મોહિતો
યન્માયયા વિષ્ણુરયં ચ મોહિતઃ ।
તમેવ ભસ્માઙ્કિતસર્વગાત્રા
ભજધ્વમદ્યપ્રભૃતિ ત્રિણેત્રમ્ ॥ ૫૫॥

સંસારપાશૌઘવિનાશહેતું
ગુણૌઘસેતું મુનિમુક્તિહેતુમ્ ।
શ્રીપાર્વતીનાથમનન્યભાજો
ભજધ્વમદ્યપ્રભૃતિ ત્રિણેત્રમ્ ॥ ૫૬॥

યત્પાદપદ્માર્ચનમાત્રલભ્યો
મોક્ષઃ સમસ્તૈરપિ દુર્લભોઽપિ
શ્રીપાર્વતીનાથમનન્યભાજો
ભજધ્વમદ્યપ્રભૃતિ ત્રિણેત્રમ્ ॥ ૫૭॥

ભજન્તિ મોહેન શિવાન્યમન્યે
સદા મહાપાતકસઙ્ગદુષ્ટાઃ ।
ભજન્તિ ધન્યાઃ શિવમેકમીશં
વિશ્વાધિકઃ શઙ્કર એવ સત્યમ્ ॥ ૫૮॥

સત્યં બ્રવીમિ ધ્રુવમદ્ય સત્યં
સત્યં બ્રવીમિ ધ્રુવમદ્ય સત્યમ્ ।
રુદ્રાધિકત્વં પ્રતિપાદયામિ
દેવો ન રુદ્રાદધિકોઽસ્તિ કશ્ચિત્ ॥ ૫૯॥

રુદ્રસ્ય પુત્રઃ સ હરિઃ સ રુદ્રા-

દાપ્તઃ કથં સ્યાદધિકસ્ય પુત્રઃ ।
પુત્રઃ પિતુઃ સેવક એવ (નિત્યં)
સોમસ્ત્રિણેત્રોઽસ્ય યતઃ પિતાસ્ય ॥ ૬૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋગ્વેદપ્રોક્તા શિવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૨। ૪૭.૨-૬૦॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 22 . 47.2-60..

Proofread by Ruma Dewan

*Rigvedaprokta Shiva Stuti*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*